PAGE(S) MISSING
NOT AVAILABLE

FOLIO NOS
1 TO 4

भ्योवस्तुभ्यः पृथक्पृथक्क्रमेणोत्पद्यते। बुद्धिर्नामनिश्चयात्मिकान्तःकरणवृत्तिः मनोनामसंक
ल्पविकल्पात्मिकान्तःकरणवृत्तिः। अनयोरेवचित्ताहंकारयोरेतर्भेदः एतयोःपुनराकाशादिगत
सात्विकांशेभ्यःक्रमेणोत्पद्यते तत्समुदायश्चैकं बुद्धिवृत्तिविज्ञानसहितास्तीविज्ञानमयःकोशोभवति। अयंमम
कर्त्तास्मिभोक्तास्मिसुखीदुःखीत्याद्यभिमानित्वेनेहलोकपरलोकगामीव्यावहारिकोजीवइत्युच्यते मन
स्तुकर्मेंद्रियैःसहितंसन्मनोमयकोशोभवति। कर्मेंद्रियाणि। वाक्यानिपादपायूपस्थाख्यानि
तानिपुनराकाशादीनांरजोंशेभ्यस्तेभ्यःपृथक्पृथक्क्रमेणोत्पद्यंते। तथाप्ययंक्रमः॥ आप
काशाच्छ्रोत्रंकर्णेंद्रियंवायोस्त्वक्पाणीतेजसश्चक्षुःपादोऽभ्योजिह्वापायुःपृथिव्याघ्राणोघ्रा
पस्थेंद्रिये॥ वायवःप्राणापानव्यानोदानसमानाः। प्राणोनामप्राग्गमनवान्नासाग्रस्था
नवर्त्ती। अपानोनाम। अवाग्गमनवान्। पाय्वादिस्थानवर्त्ती। व्यानोनाम। विष्वग्गमनवान्।
अखिलशरीरवर्त्ती। उदानोनामोत्क्रान्तीयऊर्द्ध्वगमनवान्। उत्क्रमणवायुः। समानःशरीरम

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

योगः सितपीतादिर्नोत्तमीकरणकरः केचित्। नागः कूर्मः कलदेवदत्तधनंजयाख्याः। पंचानां
वायवः संतीति वदंति। नागउद्गीरणकरः। कूर्मउन्मीलनकरः। कलः क्षुत्कारः। देवदत्तो जृंभनंक
रः। धनंजयः पोषणकरः। एतेषां प्राणादिपंचवृत्तिभेदानां प्राणाद्याः पंचवृत्तयः। इदं प्राणादिपंचकं
आकाशादिगतरजोंशेभ्यो मिलितेभ्य उत्पद्यते। इदं प्राणादिपंचकं कर्मेंद्रियैः सहितं सत्प्राणमयः
कोशो भवति। अस्यक्रियाकर्तृत्वेन रजोंशकार्यत्वं। तेषु कोशेषु मध्ये विज्ञानमयो ज्ञानशक्तिमा
नकर्तृरूपः। मनोमयश्छाशक्तिमान्करणरूपः। प्राणमयः क्रियाशक्तिमान्। कार्यरूपः। योग्य
त्वादेवमेतेषां विभागश्चतुर्विधो युक्तः। एतत्कोशत्रयं मिलितं सत्सूक्ष्मशरीरमित्युच्यते। अत्राप्यविव
क्षितसूक्ष्मशरीरमेकबुद्धिविषयतया वनवज्जलाशयवद्व्यासमर्षिः। अनेकबुद्धिविषयतया व
नवज्जलवद्वा व्यष्टिरितिवभक्ति। एतत्समष्ट्युपहितं चैतन्यं सूत्रात्माहिरण्यगर्भः प्राणश्चेति
चोच्यते। सर्वानुस्यूतत्वात्। ज्ञानक्रियाशक्तिमदुपहितत्वाच्चास्यैषा समष्टिरूपता

पेक्षया सूक्ष्मत्वात्सूक्ष्मशरीरं। विज्ञानमयादिकोशत्रयं जाग्रत्स्वप्नमयत्वात्स्वप्नः। अतएवस्थू
लप्रपंचलयस्थानमितिचोच्यते। एतद्व्यष्ट्युपहितं चैतन्यं तैजसोभवति। तेजोमयांतःकरणोप
हितत्वात्। अस्यापीयंव्यष्टिःस्थूलशरीरापेक्षया सूक्ष्मत्वात्हेतोरेवसूक्ष्मशरीरं विज्ञान
मयादिकोशत्रयं जाग्रत्स्वप्नमयत्वात्स्वप्नःस्थूलशरीरप्रलयस्थानमितिचोच्यते। एतत्सूत्रा
त्मतैजसोतद्वानीमनोहंतिभिः सूक्ष्मविषयानुभवतः प्रविविक्तभुक् तैजसइत्यादिभिर्मंत्रैः।
अत्रापियद्यपिसमष्टयस्तदुपहितसूत्रात्मतैजसयोश्च वनवृक्षवत् तदवच्छिन्नाकाशवज्जल
शयजलवत्तदुत्पत्तिविराकाशवद्भेदः। एवंसूक्ष्मशरीराप्तिः स्थूलभूतानिपंचीकृतानि।
पंचीकरणंतु। आकाशादिषुपंचस्वेकंद्विधासमं विभज्यतेषु दशसुभागेषु प्राथमिकान्पंच
भागान् प्रत्येकं चतुर्धासमं विभज्यतेषां चतुर्णां चतुर्णां भागानां स्वस्वद्वितीयभागपरित्यागे
नान्यभागेषु योजनं। तदुक्तं द्विधाविभज्यैकैकं चतुर्द्धाप्रथमं पुनः स्वेतरद्वितीयांशैर्योजि

जनात्यंवर्णवर्णेति। अस्यार्थमाएयेनाशंकनो यंत्रिवृत्करणोक्तेः। पंचीकरणास्याप्युपलक्षणा
त्वा। पंचभूतोपादानत्वसमानधर्मवशात्तद्वादितिन्यायेनाकाशादिव्यपदेशः संभवति। त
दानीमाकाशादयो विभज्यंते। वायोशब्दस्य शौ। अग्नेशब्दस्य शरूपाणि। अप्शब्दस्य श
रूपरसाः। पृथिव्याशब्दस्य शरूपरसगंधाश्च। एतेभ्यः पंचीकृतेभ्यो भूर्भुवःस्वः महः जनः तपः
सत्यमित्येतन्नामकानामुपर्युपरिविद्यमानानामतलसुतलवितलरसातलतलातल
महातलनामकानामधोधोविद्यमानानां लोकानांब्रह्मांडस्य तदंतर्वर्ति चतुर्विधस्थूलशरी
राणामन्नदोषोत्पत्तिर्भवति। शरीराणिचजरायुजांडजस्वेदजोद्भिज्जाख्यानि। जरायुजा
निजरायुभ्योजातानि। मनुष्यपश्वादीनि। अंडजानि। अंडेभ्योजातानि। पक्षिसर्पनगादीनि। स्वे
दजानि। स्वेदेजातानि। यूकामत्कुणादीनि। उद्भिज्जानिभूमिमुद्भिद्यजातानि कक्षद्रुमादीनि।
अत्रापि चतुर्विधस्थूलशरीरमेकैकबुद्धिविषयतया वनवज्जलाशयवद्वासमष्टिस्थूलब्र

ह्मव्यष्टिरूपंभवति। एतत्समष्ट्युपहितंचैतन्यंवैश्वानरोविराडितिचोच्यतेसर्वनरामिमानित्वा
त्। विविधंराजमानत्वाच्च। अस्योपासमष्टिस्थूलशरीरमन्नविकारत्वादन्नमयकोशः। स्थूलभो
गायतनत्वाच्च। जाग्रत्स्वप्नविषयपरि[illegible]ते। एतद्व्युपहितंचैतन्यंविश्वइत्युच्यते। सूक्ष्मशरीरमप
रित्यज्यस्थूलशरीरंप्रविश्य। तद्भोगायतनत्वात्। अस्योपा[illegible]स्थूलशरीरमन्नविकार
त्वादेवहेतोरन्नमयकोशोजाग्रदितिचोच्यते। तदानीमृतौविश्वंवैश्वानरोदिग्वातार्कवरुणाश्वि
भिःकर्मेन्द्रियैस्त्रिवृतेनभ्रोत्रादींद्रियपंचकेनकर्मेंद्रियशब्दस्यशरूपरसगंधाख्यैर्विषयैरियमप्रजायतेभिः
कर्मनिमित्तंत्रिवृतेनवागादींद्रियपंचकेनकर्मोपादानागमनविसर्गानंदाभेदाच्चतुर्मुख
शब्देनोक्तैः कर्मेंद्रियैस्त्रिवृतेनमनोबुद्ध्यहंकारचित्तस्थानांतरींद्रियचतुष्केनकर्मोपकरणत्वान्नभ्रे
याहंकार्यैरिंद्रियैश्चसर्वानेतान्स्थूलविषयाननुभवतः जागरितस्थानोबहिःप्रज्ञत्वादित्युक्तेः।
अत्राप्यनयोस्थूलशरीरमष्ट्योस्तदुपहितयोर्विश्ववैश्वानरयोश्चवनवृक्षवत् तदवांतरजाति

शवच्च जलाशयजलवत्। तत्र तत्प्रतिबिंबाकाशवच्च पर्ववदभेदः। एवं पंचीकृतभूतेभ्यः स्थूलप्रपंचोत्पत्तिः। तेषां स्थूलत्वसूक्ष्मकारणप्रपंचानामपि समष्टिरेकः प्रपंचो भवति। यथा वातरवतानां एकं महदनंतं यथा वातरजलाशयानां समष्टिरेको महान् जलाशयः। एतदुपहितं विश्ववैश्वानरादीश्वरपर्यंतं चैतन्यमपि अवांतरसंकल्पितनाकाशवदवांतरजलाशयप्रतिबिंबाकाशवदेकमेव। अ म्यां महाप्रपंचेनोपहितं चैतन्याभ्यां तत्प्रायः पिंडवत्। अविविक्तं सत् इदमुपहितं चैतन्यं स्वस्वं स्वल्पिंडं ब्रह्मेति। वा स्यवा व्यविविक्तं सत् सूक्ष्ममपि भवति। एवं वस्तुन्यवस्त्वारोपः सामान्येन प्रदर्शितः। इदानीं प्रत्यगात्मनि इदमिदमयमयमारोपयतीति विशेषतः उच्यते। अतिप्रियत्वात्मावे पुत्रः इतिश्रुतेः। स्वस्मिन्निवस्वपुत्रे पित्यत्वदर्शनात्। पुत्रे पुष्टेनष्टे वाहमेव पुष्टोनष्ट स्त्रीत्यनुभवाच्च। पुत्रआत्मेतिवदति। वाचोकस्तुसकृष्णपुरुषान्नरसमयइतिश्रुतेः। प्रदीप्तगृहात्स्वपुत्रंपरित्यजतिपि स्वस्यनिर्गमनदर्शनात्। स्थूलोहंकृशोहमित्यादयनुभवाच्च। स्थूल

शरीरमात्मेतिवदति। अपरश्चार्वाकस्तेहप्राणाः प्रजापतिमेत्य ब्रुवन्नित्यादिश्रुतेः। इंद्रियाणामभावे शरीरस्य चलनाभावात्। काणोहं बधिरोहमित्यादयनुभवाच्च। इंद्रियाण्यात्मेतिवदति॥ अपरश्चार्वाकोन्योंतरात्मा प्राणमयइत्यादिश्रुतेः। प्राणाभावे इंद्रियादिचलनयोगादहमेवनाना यावानहंपिपासावानित्यादयनुभवाच्च। प्राणआत्मेतिवदति। अन्यस्तुवावाकोन्योंतरात्मा मनोमयइत्यादिश्रुतेः। मनसिसुप्तप्राणादेरभावात्। अहंसंकल्पवानहंविकल्पवानित्यादयनुभवाच्च। मनआत्मेतिवदति। बौद्धस्तु। अन्योंतरात्मा विज्ञानमयइत्यादिश्रुतेः। कर्तृभावे करणस्य शक्त्यभावादहंकर्त्ता। अहंभोक्ताइत्यादयनुभवाच्च। बुद्धिरात्मेतिवदति प्राभाकरतार्किकावन्योंतरात्मानंदमयइत्यादिश्रुतेः। बुद्ध्यादीनामज्ञानेलयदर्शनात्। अहमज्ञोहंज्ञानीत्यनुभवाच्च॥ ज्ञानमात्मेतिवदतः। भाट्टस्य। प्रज्ञानघनएवानंदमयइतिश्रुतेः सुषुप्तौप्रकाशप्रकाशस्याभावात् अहंनज्ञानामीत्यनुभवाच्च। ज्ञानोपहितचैतन्यमात्मेतिवदति अपरोवेदांतवेदमयं

DR. GAURINATH SASTRI COLLECTION MEMORIAL

आत्मादित्यादिश्रुतेः। सुषुप्तौ सर्वोपाधिविलयादहंसुप्तेर्नासमिति तस्यस्वभावपरामर्शात्॥
विषयाद्यननुभवाच्च सिद्ध्यमात्मेतिवदंति। एतेषां पुत्रादीनामनात्मत्वमुच्यते। एतेरतिप्रीतिता
दिवादिभिरुल्लेखैश्रुतिः युक्त्यनुभवाभासैः सहपूर्वपूर्वोत्तरोत्तरैरुल्लेखैश्रुतिः युक्त्यनुभवाभासैरात्मत्वबाधदर्शनात्पुत्रादीनामनात्मत्वं स्पष्टमवगम्य, तस्य
त्यागस्तु लोकवस्तु प्राणो मनो कर्त्री चैतन्यं चिन्मात्रं सदित्यादिश्रुतिभिरात्मदृश्यपुत्रादि शून्यपर्यंतस्य तत्स्वेतन्यभास्यत्वेनघटादिवदनात्मत्वात्। अहं ब्रह्मेति। चैतन्यं
नुभवप्राबल्या श्रुतियुक्त्यनुभवाभासानांबाधितत्वादेवपुत्रादि शून्यपर्यंतमखिलं
मनात्मैव। अतस्तन्नाशेनित्यशुद्धबुद्धमुक्तस्वभावंप्रत्यक्चैतन्यमात्मतत्वमितिवेदांतवि
द्वदनुभवः। एवमध्यारोपः। अपवादोनाम। रज्जुविवर्त्तरूपाविद्यात्यागेनान्यथास्फुरणविव
र्त्तः। स्वरूपपरित्यागेन्यथास्फुरण परिणामः सर्पस्यरज्जुमात्रवत्। वस्तुविवर्त्तस्यावस्तु

नोज्ञानादिःप्रपंचस्यवस्तुमात्रत्वं। तथाहि पतद्भोगायतनंचतुर्विधस्थूलशरीरजातंभोग्यरूपमन्नादिभूत
दाश्रयीभूतंभूरादिचतुर्दशभुवनानिएतदाश्रयभूतंब्रह्मांडंचेतनेषांकारणभूतपंचीकृतभूतमात्रं
भवति।तानिशब्दादिविषयसहितानिपंचीकृतभूतजातानिसूक्ष्मशरीरजातंतत्सर्वमेतेषांकारण
रूपापंचीकृतमात्रंभवति। एतानिसत्त्वादिगुणसहितान्यपंचीकृतान्युत्पत्तियुक्त्यनुभवैतत्कारणभूता
ज्ञानोपहितचैतन्यमात्रंभवति। एतदज्ञानमज्ञानोपहितचैतन्यंजीवरूपकमेतदाधारभूतानुप
हितचैतन्यंतुरीयंब्रह्ममात्रंभवति। त्रयाणामध्यारोपापवादाभ्यांतत्वंपदार्थशोधनमपिसिद्धंभवति।तथाहि
अज्ञानादिसमष्टिरेतदुपहितंसर्वज्ञत्वादिविशिष्टंचैतन्यमेतदनुपहितंचैतन्यं। अयंतत्पदार्थः पिंडब्रह्मैक्ये
नावभासमानंतत्पदवाच्यार्थः। अज्ञानादिव्यष्टिरेतदुपहितान्नेत्वादिविशिष्टंचैतन्यमेतदनुपहितं
चैतन्यंअयंत्वंपदार्थः पिंडब्रह्मैक्येनावभासमानंत्वंपदवाच्यार्थोभवति। एतदुपाध्युपहिताधारम
तमनुपहितंप्रत्यगानंदतुरीयचैतन्यंतदैक्यार्थोभवति। अथवाकार्यावरणेते।इदंतत्त्वमस्यो

दि वा क्यं संबंधत्रयेण खंडार्थबोधकं भवति। संबंधत्रयं नाम। पदयोः समानाधिकरण्यं पदा
र्थयोर्विशेषणविशेष्यभावः। पदार्थप्रत्यगात्मनो लक्षणाभावश्चेति। तद्यथा। सामाना
धिकरण्यं च विशेषणविशेष्यतालक्षणसंबंधः पदार्थप्रत्यगात्मनोरिति। सामानाधिकरण्य
देवदत्त तसंबंधः। तद्यथा सोयं देवदत्तशब्दितवाक्ये तत्कालविशिष्टदेवदत्तवाचकस शब्दस्य एतत्काल
विशिष्टवाचकायं शब्दस्य चैकस्मिन्पिंडे तात्पर्यसंबंधः। तथा त्वमसि वाक्ये परो क्षत्वादिविशि क्ष
ष्टचैतन्यवाचकतत्पदस्यापरोक्षत्वादिविशिष्टचैतन्यवाचकत्वंपदस्यैकस्मिन् चैतन्ये तात्प
र्यसंबंधः। विशेषणविशेष्यभावसंबंधस्तु। यथा तत्त्वंपदवाक्ये स शब्दार्थतत्कालविशिष्टदेवदत्त
स्यायं शब्दार्थैतत्कालविशिष्टदेवदत्तस्य चान्योन्यभेदव्यावर्त्तकतया विशेषणविशे भावः। ष ८
तथा त्वमपि वाक्ये तत्पदार्थपरोक्षत्वादिविशिष्टचैतन्यस्यत्वं पदार्थपरोक्षत्वादिविशिष्टचैतन्य
स्यैक्यं चान्योन्यभेदव्यावर्त्तकतया विशेषणविशेष्यभावः। लक्षणसंबंधस्तु यथा। तत्त्वमस शब्दा

यंशब्दयोस्तदर्थयोर्विरुद्धतत्कालैतत्कालविशिष्टत्वपरित्यागेनाविरुद्धदेवदत्तेनसहलक्षण
भावः। तथा त्वमपितत्वंपदयोस्तदर्थयोर्विरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टत्वपरित्यागेना
विरुद्धचैतन्येनसहलक्षणभावः। इयमेवभागलक्षणात्यज्यते। अस्मिन्वाक्येनीलमुत्पल
मितिवाक्यतोवाक्यार्थेन संगच्छतेतत्रनीलपदार्थं नीलगुणास्योत्पलपदार्थोत्पलद्रव्यस्य
च शुक्लपटादिव्यावर्त्तकतया न्योन्यविशेषणविशे भावसंसर्गस्यान्यतर विशिष्टस्यान्य ष
तरस्य तदेक्यवाक्यार्थत्वांगीकारे प्रमाणांतरविरोधाद्वाक्यार्थः संगच्छते। अत्रत्वंपदो तदर्थ
क्षत्वादिविशिष्टचैतन्यस्यत्वमर्थपि क्षत्वादिविशिष्टचैतन्यस्यचान्योन्यभेदव्यावर्त्तकतया
विशेषणविशेष्यभा सर्गस्यविशिष्टस्यैकस्यंवाक्यार्थत्वांगीकारेप्रत्यक्षादिप्रमाविरोधाद्वाक्या
र्थेनसंगच्छते। तत्र तुगंगायांघोषोवसतीतिवाक्यवज्जाह्यलक्षणनसंगच्छते। अत्रगौणवृ
त्त्याराध्याराधेयभावलक्षणास्यवाक्यार्थस्याशयतेविरुद्धवाक्यार्थमंशेपरित्यज्यतेतस्मा

प्रति

एवं

बंधितीरलक्षणायायुक्त्वाज्जहल्लक्षणासंगच्छते। अत्रतुपरोक्षत्वापरोक्षत्वविशिष्टचैतन्यैकत्व
लक्षणस्यवाक्यार्थस्यभागमात्रविरोधात्।भागांतरमपिपरित्यज्यान्यलक्षणायाअयुक्त्वा
ज्जहल्लक्षणानसंगच्छते। नचांशमात्रंस्वार्थंपरित्यागेनयथातीरपदार्थंलक्षयति।तथातत्पदत्वं
पदंवासंपूर्णंपरित्यागेनत्वंपदार्थंतत्पदार्थंवालक्षयतु। अतःकुतोजहल्लक्षणानसंगच्छतइतिवा
च्यं। तत्रतीरपदा श्रवणेतदर्थप्रतीतौलक्षणायातत्प्रतीत्यपेक्षायामपि। तत्त्वंपदयोःश्रूयमा
णत्वेनतदर्थप्रतीतौलक्षणयापुनरन्यतरपदेनान्यतरपदार्थप्रत्यपेक्षाभावात्। अत्रदशमेधाव ती
तीतिवाक्यवदजहल्लक्षणापिनसंभवति।तत्रदशमेगुणगमनलक्षणस्यवाक्यार्थस्यविरुद्ध
त्वादपरित्यागेनतदाश्रयाभारिलक्षणायांतद्विरोधपरिहारसंभवादजहल्लक्षणासंभव ७०
ति। अत्रतुपरोक्षत्वादिविशिष्टचैतन्यैकत्वस्यविरुद्धत्वात्तदपरित्यागेनतत्सं बंधिनोयस्य
कस्यचिदर्थस्यलक्षितत्वेपितद्विरोधपरिहारादजहल्लक्षणानसंभवत्येवचैनंत्वंपदंतमदं
धा

वाक्यार्थविरुद्धांशपरित्यागेनशेषांतरसहितंतत्पदार्थंत्वंपदार्थंलक्षयतु। अथकथंप्रकारां
तरेणभागलक्षणांकुर्मएवाचक्षाणेनपदेनस्वार्थांशपदार्थांतरभयलक्षणायाअसंभवात्।
परांतरेणतुदेशप्रतीतौलक्षणायापुनःप्रतीत्यपेक्षाभावाच्च। तस्मात्सुष्ठुसोयंदेवदत्तइतिवा
क्यं।तदर्थौतत्कालेतत्कालविशिष्टदेवदत्तलक्षणस्य वाक्यार्थस्यसैवविरोधाद्विरुद्धतत्का
लेतत्कालंविशिष्टांशंपरित्यज्यअविरुद्धंदेवदत्तांशमात्रंलक्षयति।तथातत्वमसिवाक्यं
तदर्थौवापरोक्षत्वापरोक्षत्वविशिष्टचैतन्यैकत्वलक्षणस्यवाक्यार्थस्यापिविरोधात्विरु
द्धंपरोक्षत्वादिविशिष्टत्वांशंपरित्यज्यअविरुद्धमखंडचैतन्यमात्रंलक्षयतीति। अथाभ्युच्यते ५४
ब्रह्मास्मीत्यनुभवोवाक्यार्थोविशेष्यते। एवमप्यार्यस्यापिध्यानेवाधबाधपुरस्सरंतत्त्वंपदार्थौश्रु
त्यायित्वावाक्यार्थंखंडार्थंबोधयितुंशक्तौतत्त्वंपदेकारणादिनित्यशुद्धबुद्धमुक्तस्वत्स्वभावपरमानंदा
नंताद्वयंब्रह्मास्मीतिस्वंशाकारताकारितावृत्तिरुदेति। सात्वविद्याप्रतिबिंबसहितासतीप्रत्या

गमिन्नमज्ञातं परब्रह्मविषयीकृत्यतदज्ञानमेव बाधतेतदापटकारणतंतुदाहेपटदा
हवत्। अखिलकारणेअज्ञानेबाधितेसतितत्कार्यस्याखिलस्यबाधितत्वात्तदंतर्भूतारवंड
कोराकारितचित्त वृत्तिरपिबाधिताभवतितत्रप्रतिबिंबितंचैतन्यमपियथादीपप्रभाआदि
त्यप्रभाभासनास्वमर्थासतीतयाभिभूत भवति। यथास्वयंप्रकाशमानप्रत्यगभिन्नपरब्र
ह्मावभासनानहितथातेनाभिभूतंसत्। स्वांशचिन्मात्राखंडवृत्तेर्बाधितत्वादृपेणाभवेमुखप्रतिबिं
बस्यमुख्यमात्मचैतन्यंप्रत्यगभिन्नंपरब्रह्ममात्रंभवति। एवंचसतिमनसेवानुद्रष्टव्यंमनसान
मनुतेइत्यनयोरविरोधः। नन्वित्थंचायंचोभीकारेणफलव्यापत्वप्रतिषेधप्रतिपादनाच्चतदुक्तफ
लव्यापत्वमेवास्यशास्त्रस्यलक्ष्यंनिर्बाधंब्रह्मणएज्ञाननाशायवृत्तिव्याप्तिरपेक्षितेति।स्वयंप्रका
शमानत्वान्नाभासउपयुज्यतइति। बाढंजडपदार्थीकाराकारितचित्तवृत्तेर्विशेषोस्ति।तथा
हि। अयंघटइतिघटाकाराकारितचित्तवृत्तिरज्ञातंघटंविषयीकृत्यततोज्ञाननिरसनपुरस्स

ता४ १७ १७ स्थ २

टमपि ८ गा४ ६ टा

रंस्वगतंचिदाभासेनजडंघटं भासयति। यथादीपप्रभामंडलंत्रैधकारगतंघटपटादिकंविषयीकृत्य
तद्गतांधकारंनिरसनपुनस्सरंस्वप्रभयातदप्यभासयतीति। एवंस्वरूपंचैतन्यंसाक्षात्कारपर्यंतंश्रवण
मननैनिदिध्यासनसमाख्यानुष्ठानस्यापेक्षितत्वात्तेनापिप्रत्यक्ष्यते।श्रवणंनामषड्विधलिंगैरद्वैतवेदा
नामद्वितीयेवस्तुनितात्पर्यावधारणंलिंगानितूपक्रमोपसंहाराभ्यासपूर्वतांफलार्थवादोप
पत्तीरित्याहुः। प्रकरणप्रतिपाद्यस्यतदाद्यंतयोरुपपादनंउपक्रमोपसंहारौयथाछांदोग्येप्रपा
ठके प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुन्येकमेवाद्वितीयमित्यादावे तदात्म्यमिदंसर्वमित्येतत्प्रति
पादनंप्रकरणप्रतिपाद्यस्यतन्मध्येपौनःपुन्येनप्रतिपादनमभ्यासः। यथातत्रैवाद्वितीयवस्तु
नोमध्येतत्त्वमसीतिनवकृत्वःप्रतिपादनं।प्रकरणप्रतिपाद्यस्यप्रमाणंतराविषयीकरणमद्वै
तंतथाद्वितीयवस्तुनोमानांतराविषयीकरणं।फलंतुप्रकरणप्रतिपाद्यार्थज्ञानस्यतदनु
ष्ठातस्यवातत्रश्रूयमाणप्रयोजनं। यथाभार्यावान्पुरुषोवेदतस्यतावदेवविरंयावन्नमो

तत्रैवा २

स्तु

दृक्संपत्स्यतेशक्ति अद्वितीयवस्तुज्ञानस्यतत्प्राप्तिप्रयोजनंश्रूयते। प्रकारणप्रतिपाद्यस्यत
त्प्रशंसनमर्थवादः तथातत्रो ततमादेशमप्राक्षीये नासुतेश्रुतंभवत्यमतंमतमविज्ञातंविज्ञात
मित्याद्यद्वितीयवस्तुप्रशंसने। प्रकरणप्रतिपाद्यार्थसाधनेतत्रश्रूयमाणायुक्तिरुपपत्तिः। यथा
तत्रसोम्यैकेनमृत्पिंडेनसर्वंमृन्मयंविज्ञातंस्याद्वाचारंभणंविकारोनामधेयंमृत्तिकेत्यसत्य १४
मित्यद्वितीयवस्तुसाधनेविकारस्यवाचारंभणमात्रंयुक्तिःश्रूयतेमननंतुश्रुतस्याद्वितीय
यवस्तुनोवेदांतानुगुणयुक्तिभिरनवरतमनुचिंतनं। विज्ञातीयदेहादिप्रत्ययप्रवाहरहिता
द्वितीयवस्तुसजातीयप्रवाहोनिदिध्यासनं। समाधिर्द्विविधः। सविकल्पको निर्विकल्पश्चेति।
तत्रसविकल्पकोज्ञातृज्ञानादिविकल्पलयानपेक्षयाद्वितीयवस्तुतितदाकाराकारितयावृ १२
त्तेरवस्थानंतदाभेदमयोराजादिभास्वरभानवत्। द्वैतभानेप्यद्वैतवस्तुभासते। तदुक्तंभगवतीपा
दशिष्यस्वरूपेगगनोमयेयरसकृद्विभातिजगदेकमक्षरे। अत्रैवसर्वगतेपदद्वयंतदेवाद्वैसतत्।

विमुक्तः। निर्विकल्पकस्तु ज्ञातृज्ञानादिविकल्पनयापेक्षयाद्वितीयवस्तुनितदाकाराकारितया वृत्तेरतित
रामकीभावनावस्थातेतदाजलाकाराकारितलवणानवभासेनजलमात्रावभासवत्। अद्वितीयव
स्त्वाकारितचित्तवृत्तेरनवभासेनचाद्वितीयवस्तुमात्रमवभासते। ततश्चास्मद्युत्पन्नाभेदशकान
भवति। उभयत्रहत्यभानेसमानेपितत्समाधावसंप्रज्ञातेतयोर्भेदापत्तेः। अस्यसाधनंयमनियमास
नप्राणायामप्रत्याहारध्यानधारणासमाधयः। तत्राहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहायमाः। शौ
चसंतोषतपस्वाध्यायेश्वरप्रणिधानानिनियमाः। कल्याणादिसंस्थानविशेषलक्षणानि। पद्मक स्व
स्तिकाद्यासनानिनिर्विकल्पसमाधिभंगकालहेतुप्राणनियंत्रोपायाःप्राणायामाः। प्राणायामो [illegible] स्वस्वविषयेभ्यः
प्रत्याहरणंप्रत्याहारः। अद्वितीयवस्तुनि अंतरिंद्रियधारणंधारणा। अद्वितीयवस्तुनिविच्छिद्यविच्छि
न्नातरिंद्रियवृत्तिप्रवाहोध्यानं। तदेवगाढीभूतंसविकल्पकंसमाधिः। अस्यनिर्विकल्पस्यजीवन्मुक्तस्यजीवे
पदमधुरस्वास्वादलक्षणाभ्रांतयोविधाःसंभवंति। तत्राद्यस्तावदखंडवस्तुनोवलंबनेनविचित्रहेतु
निर्देशमखंडवस्तुनवलंबनेनविचित्रहेत्यन्यावलंबनेनविहेयः। [illegible] विहेयाभावेसतिहेतुः रागादिका

सनया स्तूष्णीभावादखंडवस्त्वनवलंबनंकषायः। अखंडवस्त्ववलंबनेपिवित्तदृत्तेःसविकल्पका
नंदास्वादनंदरसास्वादः। समाध्यारंभसमयेसविकल्पकानंदास्वादनंवा। अनेनविभ्रमवस्तुदृश्येन
रहितंचित्तंनिर्वीतपदीवंपेदस्खलंसदखंडचैतन्यमात्रमवतिष्ठतेयदातदानिंविकल्पकसमाधेर्वि
त्तं। तदुक्तंलयेसंबोधयेच्चित्तंविक्षिप्तंसमयेपुनः। सकषायंविजानीयात्समप्राप्तंनबालवत्। इ
त्यास्वादयेन्नरसंतत्रनिःसंगःप्रज्ञयाभवेदिति। यथादीपोनिवातस्थोनेंगतेसोपमास्मृतेति। अ
पिजीवन्मुक्तेर्लक्षणमुच्यते। जीवन्मुक्तानामस्वरूपाखंडब्रह्मज्ञाननतदज्ञानबाध द्वारास्वरू
पाखंडब्रह्मणिसाक्षात्कृतेज्ञानतत्कार्यसंचितकर्मणांनाशायविपर्ययादीनामपिबाधितत्वादस्तु
संबंधरहितोब्रह्मनिष्ठः। भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः। क्षीयंतेचास्यकर्माणितस्मिन्दृष्टे
परावरइत्यादिश्रुतेः। अथैतुमुक्तस्यसमयंमांससंभवंतन्मत्रपुरीषादिभाजनेनशरीरेणाध्यमा
द्यापुरुषादिभाजनेनेंद्रियग्रामेणाशनायापिवाशाशोकमोहादिभाजनेनांतःकरणेनवर्तमा
विद्यानयायमाणानिकर्माणिभुज्यमानानिज्ञानविरुद्धारब्धफलानिचपश्यन्नपिबाधित

त्वात्परमार्थतोनपश्यति। यथेंद्रजालंमितिज्ञानवान्तदिंद्रजालंपश्यन्नपिपरमार्थमितिनप
श्यति। सचक्षुरक्षुरिवसकर्णकर्णइत्यादिश्रुतेश्चक्षुरादिवत्। सुषुप्तवज्जाग्रतियानपश्यति। हय
नुपश्यन्नपिवाहयन्नतः। तथापिकुर्वन्नपिनिष्क्रियश्चयः सश्रांतेवेत्यादिन्यायतो हिनिश्चयः। अस्य
ज्ञानात्पूर्वंविदुषोमानाभिमतस्याहारविहारादीनामनुवर्तमानत्वंशुभवासनानामेवानुवर्तमा
नत्वंशुभाशुभयोरौदासीन्यंवातदुक्तं। तुष्टोहैतस्यतत्वस्ययथेष्टाचरणंयदि। शुनांतत्वदृशांचैव
कोभेदोशुचिभक्षणइति। ब्रह्मविद्वरिष्ठस्तथामुक्तोसत्रात्मज्ञानेनचेतरइति। कामानिवादीनेत्ता
नसाधनत्वद्वेष्टत्वायसहकारिणश्चांगीकारवदनुवर्तते।

तदुक्तं। तद्वत्तोत्पन्नात्मविद्यस्यद्वेष्टृत्वादयोगुणाः। अशेषतोभेदस्यनतु
साधनरूपाणः इतिकिंबहुनायदेहमात्रोपयोगिनिष्ठापरेष्ठाप्रतिपत्तानिसुषुप्तवदुःखव
त्कर्मणान्यारब्धफलान्यनुभवन्नंतःकरणाभासादीनामबाधकसन्नतद्वशेनप्रत्य
गद्वयब्रह्मणिप्राणलीनेसत्यज्ञानतत्कार्यसंस्काराणामपिविनाशात्परमकैवल्यमात्मानंक

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

रसमरिचलभेदप्रतिभासरहितमखंडब्रह्मावतिष्ठते। तेनेस्यप्राणउत्क्रामत्येवमेवास्माल्लोकात्प्रविमुच्यतइतिश्रुतेः॥ ॥इतिश्रीवेदांतसारसमाप्तः॥ ५॥श्रीपरशुरामार्पणमस्तु॥

॥ इदंपुस्तकंलिखितंपरशुरामज्योतिषीगुडगोदर॥शके१६००कालयुक्तसंवत्सरे॥

DR. BHAU DAJI MEMORIAL